# कालिदासरूपकाणां शास्त्रीयं स्वरूपम्


## डा. रीताज्ञवाली (पौड्यालः)

*सहप्राध्यापकः,विश्वविद्यालयविद्यापीठम्, दाङ्गः*

jnawalir36nsu@gmila.com



### लेखसारः

*संस्कृतकाव्यशास्त्रे काव्यं द्विधा विभक्तम् – श्रव्यं दृश्यञ्च। दृश्यकाव्यमपि नाटकप्रकरण–भाणादिषु दश रूपकप्रकारेषु नाटिकात्रोटकगोष्ठ्यादिषु चानेकेषूपरूपकप्रकारेषु विभक्तम्। रूपकं हि नाटकं नाट्यमित्यादिशब्दैरपि व्यवह्रियते। संस्कृतकाव्यनाट्याचार्यैर्नाटकशब्दो द्वयोरर्थयोः प्रयुक्तो दृश्यते। एकोऽर्थो रूपकस्य प्रथमभेदरूपेणापरश्च सर्वेषामपि रूपकोपरूपप्रकाराणां सामान्यरूपेण। महाकवेः कालिदासस्य तिसृषु रूपककृतिषु विक्रमोर्वशीयं चित्तावर्जका रूपककृतिर्वर्तते। पञ्चस्वङ्केषु विभक्तेऽस्मिन् रूपके शृङ्गारो रसोऽङ्गित्वेन विद्यमानो वर्तते। अत्र पुराणादिषु वैदिकवाङ्मये च प्रथितस्य राजर्षेः पुरुरवस उर्वश्याश्च प्रेमकथा प्रस्तुता वर्तते। महाकविना कालिदासेन रूपकस्यास्य प्रस्तावनायां नाटकशब्देनोल्लेखोऽकारि। कवेः कथनेऽस्मिन् नाटकशब्दो रूपकसामान्यस्यार्थात् सर्वेषां रूपकोपरूकाणां कृते प्रयुक्तो विद्यते। वस्तुतस्तु शास्त्रीयस्वरूपविश्लेषणे रूपकेऽस्मिन्नुपरूपकस्य त्रोटकस्य लक्षणं सर्वथान्वेतीति रूपकमिदं त्रोटकरूपमेव वर्तते। आलोचकैरपि विक्रमोर्वशीयं त्रोटकनाम्नैव स्मृतं दृश्यते। राज्ञोऽग्निमित्रस्य मालविकायाश्च प्रणयकथायाः काव्यनाट्यकलयोरनुपमस्य योगस्योपन्यासेन ग्रथितं मालविकाग्निमित्रं रूपकमपि कविना कालिदासेनात्मना रूपकप्रस्तावनायां रूपकसामान्यार्थबोधकतया नाटकशब्देनैव स्मृतमपि नाटिकानामकस्योपरूपकस्य लक्षणं सर्वथा बिभर्तीति मालविकाग्निमित्रं नाटिका वर्तते। महाकवेः कालिदासस्य तृतीयं रूपकमभिज्ञानशाकुन्तलं पुराणेषु ख्यातां दुष्यन्तशकुन्तलयोः कथामाधृत्य परिष्कृत्य च रसानुकूलतया प्रस्तुतमस्ति। महाकवेः कालिदासस्याभिज्ञानशाकुन्तलं नाम रूपकं संस्कृतकाव्यशास्त्रानुसारेण प्रायः सर्वैः काव्यशास्त्रिभिर्दशसु रूपकेष्वाद्यरूपकत्वेन व्याख्यातस्य नाटकस्य लक्षणेन समन्वितं वर्तत इति नाटकसंज्ञितं रूपकं सिध्यति।*



### शब्दकुञ्जिका

रूपकम्, त्रोटकम्, नाट्यम्, संवाहकः, सन्दर्भः।


### विषयपरिचयः

संस्कृतकाव्यशास्त्रिभिरिन्द्रियग्राह्यदृशा काव्यं श्रव्यं दृश्यञ्चेति द्विधा विभक्तं दृश्यते। तत्र श्रवणेन्द्रियमात्रग्राह्यं काव्यं श्रव्यमुच्यते तच्च पद्यगद्यमिश्रादिरूपं बहुविधं भवति। चक्षुरिन्द्रियेणापि ग्राह्यं काव्यं दृश्यमुच्यते। तच्च रूपकमभिनेयं नाट्यं नाटकमिति बह्वीभिः संज्ञाभिर्व्यवहृतं भवति। तत्र केचन वाल्मीकि–व्यास–भारवि–माघादयः कवयः श्रव्यकाव्येषु एव प्रवृत्ताः श्रव्यकाव्यानामेव निर्मितिं चक्रुः। भास–भवभूति–भट्टनारायणादयस्तु दृश्यकाव्यान्येव

प्रणीतवन्तः। परन्तु महाकविः कालिदासो रघुवंश–कुमारसम्भव–मेघदूतर्तुसंहाराख्येषु महाकाव्यखण्डकाव्यरूपेषु श्रव्यकाव्येषु विक्रमोर्वशीय–मालविकाग्निमित्राभिज्ञानशाकुन्तलाख्येषु दृश्यकाव्येषु चोभयविधेष्वपि काव्येष्वात्मनो नैपुण्यं प्रादर्शयदिति तस्य रूपकाणां नाट्यशास्त्रीयं स्वरूपं निश्चेतुं कालिदासरूपकाणां शास्त्रीयं स्वरूपमिति शीर्षकमाधृत्य लेखोऽयं प्रवृत्तोऽस्ति।

## समस्या

महाकवेः कालिदासस्य दृश्यकाव्यतयाभिहितानि विक्रमोर्वशीयमालविकाग्निमित्राभिज्ञानशाकुन्तलानि रूपकाणि संस्कृतकाव्यशास्त्रदृशा कतमं रूपकप्रकारमनुसरन्तीति प्राज्ञिकीं समस्यां समाधातुं शोधलेखोऽयं प्रवृत्तो वर्तते।

## उद्देश्यम्

संस्कृतनाट्यशास्त्रदृशा महाकवेः कालिदासस्य त्रयाणां विक्रमोर्वशीयमालविकाग्निमित्रामभिज्ञानशाकुन्तलानां शास्त्रीयस्य रूपकप्रकारस्य निर्धारणं प्रमुखमुद्देश्यं वर्तते।

## अनुसन्धानविधिः

शोधलेखोऽयं सदसद्वस्तुविवेकपरकतया गुणात्मको वर्तते। अस्मिन् शोधलेखे आवश्यकसामग्रीणां सङ्कलनाय पुस्तकालयः प्रयुक्तो वर्तते। सङ्कलितानां सामग्रीणां विश्लेषणार्थं आगमननिगमनविधिरनुसृतोऽस्ति। तथ्याङ्कानां प्रमाणीकरणे पादटिप्पण्यां परम्परितपद्धत्याः सन्दर्भग्रन्थनिर्माणक्रमे च लेखकमितिपद्धत्याः प्रयोगो विहितः।

## अनुसन्धानस्य क्षेत्रं सीमाङ्कनञ्च

अध्ययनमिदं शास्त्रीयं वर्तते। अतः संस्कृतकाव्यशास्त्रे निर्दिष्टस्य शास्त्रीयस्वरूपस्याधारेण महाकवेः कालिदासस्य त्रयाणां रूपकाणामेव शास्त्रीयस्वरूपस्याध्ययनं विधाय निष्कर्षः स्थापने सीमितं वर्तते।

## रूपकस्वरूपम्

संस्कृतनाट्यशास्त्रस्याद्याचार्यतया स्मृतो महामुनिर्भरतः 'त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्' (सं.म.सू.शा. नाट्यशास्त्रम् १।१०७) इत्यादिषु प्रायः रूपकरूपमर्थं बोधयितुं नाट्यशब्दं प्रयुञ्जानो निखिलाया एव त्रिलोक्या भावानामनुकीर्तनं नाट्यं मनुते। महामुनिना भरतेन रूपकरूपार्थबोधाय नाटकशब्दः प्रयुक्तोऽस्तीति विवृण्वता अभिनवगुप्तेन 'नाटकशब्दो रूपकमात्रवृत्तिः' (सं.म.सू.शा. नाट्यशास्त्रम् अभिनवभारती पृ.७३५) इत्यनेन, नाटकशब्दोऽयं रूपकसामान्यरूपायार्थायापि प्रयुज्यते इति बहुधा स्पष्टीकृतम्– 'तत एव नाटकशब्दः सामान्यवचनः' (सं.म.सू.शा. नाट्यशास्त्रम् अभिनवभारति पृ.१४४७)। आचार्येण हेमचन्द्रेण स्वकीये ग्रन्थे काव्यानुशासने रूपकरूपायार्थाय प्रेक्षाकाव्यशब्दस्यापि प्रयोगो विहितो दृश्यते।(काव्यानुशासनम्, पृ.३७९) आचार्येण विश्वनाथेन हि दृश्यकाव्यगतानामैतिहासिकानां कल्पितानां वा मूलपात्राणां रामकृष्णादीनां रूपस्याभिनेतृषु नटादिष्वारोपो विधीयत इति

तेषां नाटकप्रकरणादीनां रूपकनाम्ना समुल्लेखः कृतो दृश्यते– 'तद्रूपात्तु रूपकम्'। (साहित्यदर्पणः ६।१) शिङ्गभुपालेन हि एषोऽर्थः पूर्वाचार्यमतानि सङ्कलय्य चारुतया स्पष्टीकृतः–

*रसाधारं नाट्यं रूपकमित्यपि। नटस्यातिप्रवीणस्य कर्मत्वान्नाट्यमुच्यते। यथा मुखादौ प्रभावेरारोपे रूपकप्रथा। तथैव नायकारोपे नटे रूपकमुच्यते।* (रसार्णवसुधाकरः ३।१–२)

### रूपकप्रकाराः

संस्कृतनाट्याचार्यै रूपकाणि वर्गद्वये विभक्तानि दृश्यन्ते– रूपकवर्गे उपरूपकवर्गे च। महामुनिना भरतेन हि स्वकीये नाट्यशास्त्रे दशरूपकाणां समुल्लेखो विहितः –

*नाटकं सप्रकरणमङ्को व्यायोग एव च।*
*भाणः समवकारश्च वीथीप्रहसनं डिमः ॥*
*ईहामृगश्च विज्ञेयो दशेमे नाट्यलक्षणे। ॥(नाट्यशास्त्रम् ३।२०।२–३)*

एवमनेन हि १) नाटकम् २) प्रकरणम् ३) अङ्कः ४) व्यायोगः ५) भाणः ६) समवकारः ७) वीथी ८) प्रहसनम् ९) डिमः १०) ईहामृग इति नाट्यभेदरूपेण दशसङ्ख्यानां रूपकाणां स्वरूपं प्रदर्शितम्। तेन हि सङ्कीर्णरूपकत्वेनेकस्य नाटिकाख्यस्योपरूपकस्यापि स्वरूपं प्रदर्शितम्। (नाट्यशास्त्रम् ३।२०।६०–६४)

यद्यपि रामचन्द्रगुणचन्द्राभ्यां भरतेनोक्तेषु नाटकप्रकरणादिदशसु नाटिकाप्रकरण्योः समावेशं विधाय द्वादशरूपकाणि (नाट्यदर्पणः १।३–४) सट्टकश्रीगदितादीनि च त्रयोदशरूपकान्तराणि समुल्लिखितानि (नाट्यदर्पणः ४।५५–६३) तथापि धनञ्जयविश्वनाथप्रभृतिभिः प्रायो बहुभिराचार्यैर्भरतोक्तानां नाटकप्रकरणादीनां दशानां रूपकवर्गे एव गणना विहिता। (दशरूपकम् १।८ /साहित्यदर्पणः ६।३) कविराजेन विश्वनाथेनाष्टादशोपरूपकाणि समाख्यातानि– १) नाटिका २) त्रोटकम् ३) गोष्ठी ४) सट्टकम् ५) नाट्यरासकम् ६) प्रस्थानम् ७) उल्लाप्यम् ८) काव्यम् ९) प्रेङ्खणम् १०) रासकम् ११) संलापकम् १२) श्रीगदितम् १३) शिल्पकम् १४) विलासिका १५)दुर्मल्लिका १६) प्रकरणी १७) हल्लीशः १८) भाणिका इति। (साहित्यदर्पणः ६।४–६)

यद्यपि संस्कृतकाव्यशास्त्रे उपरूपकवर्गेऽस्मिन्नन्येषामपि बहूनां प्रकाराणां समुल्लेखो दृश्यते। परं प्रकृते एकस्य नाटकनामकस्य रूपकप्रकारस्य द्वयोश्च नाटिकात्रोटकयोरुपरूपकयोः समीक्ष्यत्वादन्येषां चर्चा केवलं गौरवायैव कल्पते। अत एव त्रोटकस्य नाटिकायाः नाटकस्य च त्रयाणामेव रूपकोपरूपकाणां लक्षणानि यथावश्यकं तत्तद्रूपकसमीक्षावसरे समुद्ध्रियन्ते।

### विक्रमोर्वशीयस्य सङ्क्षिप्तः परिचयः

महाकवेः कालिदासस्य तिसृषु रूपककृतिषु विक्रमोर्वशीयं चित्तावर्जिका रूपककृतिर्वर्तते। पञ्चस्वङ्केषु विभक्तेऽस्मिन् रूपके शृङ्गारो रसोऽङ्गित्वेन विद्यमानो वर्तते। अत्र हि संस्कृतवाङ्मये न केवलं पुराणादिषु प्रत्युत वैदिकवाङ्मयेऽपि प्रथितस्य राजर्षेः पुरुरवस उर्वश्याश्च प्रेमकथा नाटकीयशैल्या प्रस्तुता वर्तते। इदं हि नाटकमुपरूपकेषु त्रोटकनामकस्योपरूपकस्य लक्षणं सर्वथान्वेति। अत्र हि संयोगविप्रलम्भशृङ्गारयोरद्भुतं सम्मिश्रणं वर्तते।

विक्रमोर्वशीये महाकविना कालिदासेन प्राचीनतमं ऋग्वेदात् समाहृतमपि कथावस्तु नवैर्भावैः प्राञ्जलया भाषया चित्तावर्जक्या शैल्या रसस्य समुचितेनाभिव्यञ्जनेन च नवीनता प्रदत्ता दृश्यते।

अस्मिन् रूपके केसीनामकेन दैत्येनापह्रियमाणामुर्वशीं राजा पुरुरवा संरक्ष्य तस्याः सखीनां चित्रलेखादीनां समक्षं प्रापयति। राक्षसकरादाच्छिद्यानीयमानाया उर्वश्या राज्ञः पुरुरवसश्च परस्परं रागः समुत्पद्यते। उभावपि परस्परं मेलनार्थमौत्सुक्यं विभृतः। पुरुरवसः स्थितिं विज्ञायोर्वश्यपि पत्रमाध्यमेनात्मभावं बोधयति। तदेव पत्रमधिगत्य राज्ञी औशीनरी कुपितापि पश्चात् राज्ञोऽनुरागेऽन्तरायं न कर्तुं प्रतिजानीते। इन्द्रादेशेन नाटकाभिनयार्थमुर्वशी स्वर्गमाहूयते। नाटकेऽभिनीयमाने उर्वश्यामुखात् पुरुरवसो नामोच्चारणेन पुरुरवसः पुत्रमुखदर्शनं यावत् पृथ्व्यां स्थातुं शप्ता सा पुरुरवसा सार्द्धं पृथ्व्यां तिष्ठति। कदाचिद् गन्धमादनवनं गतौ तौ प्रणयकोपेन कस्मिंश्चित् निषिद्धे वने प्रविष्टोर्वशी लतायां परिणमति। तामन्विष्यन् पुरुरवा भृशं तप्यते। पश्चाच्च विरहव्याकुलो राजा तामेव लतामुर्वशीं मन्वान आलिङ्गति। सङ्गमनीयमणिप्रभावात् सा च लता पुन उर्वश्याः स्वरूपमाधत्ते। कालान्तरे पुत्रमुखदर्शनानन्तरं स्वर्गं गन्तुमुद्यतायामुर्वश्यां पुरुरवा चेखिद्यते। इन्द्रसन्देसानुसारं भविष्यति देवासुरसङ्ग्रामे देवसहायार्थमुर्वश्याः पुरुरवसश्चाजीवनं योगस्य श्रवणात् सर्वे हृष्टा जायन्ते।

## विक्रमोर्वशीयस्य त्रोटकत्वम्

यद्यपि महाकविना कालिदासेन स्वयमेव विक्रमोर्वशीयरूपकस्य प्रस्तावनायामस्य नाटकत्वेनैव समुल्लेखोऽकारि– 'सुत्रधारः – मारिष, बहुशस्तु परिषदा पूर्वेषां कवीनां दृष्टाः प्रयोगबन्धाः। सोऽहमद्य विक्रमोर्वशीयं नाम नाटकमपूर्वं प्रयोक्ष्ये। तदुच्यतां पात्रवर्गः स्वेषु स्वेषु पाठेष्वसंमूढैर्भवितव्यमिति।' (विक्रमोर्वशीयम् पृ. ५) परन्तु प्रायः समालोचकैर्विक्रमोर्वशीयस्य गणना त्रोटकेषु विधीयते।(साहित्यदर्पणः ६।२७३ पद्यस्य वृत्तौ) तत्र विक्रमोर्वशीयं कालिदासस्य कथनानुसारेण नाटकमुताहो समालोकानुसारेण त्रोटकमिति जिज्ञासायां संस्कृतकाव्यशास्त्रानुसारेण विक्रमोर्वशीयं त्रोटकमेव सिद्ध्यति। प्राचीनादेव कालात् त्रोटकस्य सङ्कीर्णरूपकत्वेनोल्लेखो दृश्यते। अभिनवगुप्तस्यानुसारेण त्रोटकस्य प्रथमतया लक्षणं कोहलेन विहितमासीत्। (नाट्यशास्त्रम् अभिनवभारती पृ. १४३४) सागरनन्द्यनुसारेण त्रोटके हि मनुष्यो नायको दिव्या नायिका चापेक्षिता भवति। तदनुसारेण यद्यपि बहुभिराचार्यैः त्रोटके प्रत्यङ्कं विदूषकस्य समुपस्थितिर्भवतीत्युक्तम् तथापि सागरनन्द्यनुसारेण विदूषकस्य प्रत्यङ्कमुपस्थितिरूपलक्षणमात्रमस्ति। (नाटकलक्षणरत्नकोषः पृ. ६२) अतो विदूषकस्य प्रत्यङ्कमुपस्थितिरपरिहार्या नास्ति। आचार्यस्य विश्वनाथस्यानुसारेणापि दिव्यमानुषरूपाणां पात्राणां संयोगः प्रत्यङ्कं विदूषकस्योपस्थितिः पञ्च सप्त अष्टौ नव वाङ्काः शृङ्गारश्चाङ्गी त्रोटकेऽपेक्षिता भवन्ति। (साहित्यदर्पणः ६।२७३ वृत्तौ च) सर्वेषां रूपकाणामुपरूपकाणाञ्च शास्त्रेषु समुल्लिखितं विशेषं विहायान्यत् सर्वं नाटकलक्षणतुल्यं भवति (साहित्यदर्पणः ६।६) इति काव्यशास्त्रवचनानुसारेण त्रोटके ख्यातं वस्तु ख्यात एव नायकः शृङ्गाररसोऽङ्गी वीरादयो रसा अङ्गानि भवन्ति। किञ्च नायकः ख्यातो धीरोदात्तगुणयुतो राजा भवति। एतच्च सर्वं विक्रमोर्वशीयाख्ये रूपके दृष्टिपथमवतरति।

तथा हि त्रोटके प्रख्यातो मनुष्यरूपो राजा धीरोदात्तो नायको भवति। विक्रमोर्वशीयेऽपि वेदपुराणादिषु ख्यातो मनुष्यरूपो राजा पुरुरवा धीरोदात्तो नायकोऽस्ति। धीरोदात्तस्य ह्यविकत्थनत्वक्षमाशीलत्वमहासत्त्वादयो गुणा भवन्ति। विक्रमोर्वशीयस्य नायके पुरुरवस्यप्यविकत्थनाद्याः सर्वे गुणाः समुपलभ्यन्ते। अतोऽयं धीरोदात्तनायको वर्तते। त्रोटके शृङ्गारोऽङ्गितयापेक्ष्यते। विक्रमोर्वशीयेऽपि शृङ्गाररसोऽङ्गी वर्तते। अन्ये च वीरहास्याद्भुतादयो रसा अङ्गरसत्वेन व्यक्ताः सन्ति। नायिका त्रोटकलक्षणानुसारेणैव दिव्या वर्तते। त्रोटकेषु पञ्च सप्त अष्टौ नवाङ्का वा अपेक्षिता भवन्ति। विक्रमोर्वशीयेऽपि पञ्चाङ्काः सन्ति। त्रोटकेषु प्रत्यङ्कं विदूषकोपस्थितिः समाम्नातास्ति परं विक्रमोर्वशीये प्रथमे चतुर्थे चाङ्के विदूषकस्योपस्थितिर्न दृश्यते। शेषेषु त्रिष्वङ्केषु तु विदूषको रङ्गमञ्चे दृष्टिपथमवतरति। परन्तु विदूषकस्योपस्थितिः त्रोटके प्रत्यङ्कमुपलक्षणमात्रमस्तीत्यपरिहार्या नास्ति। एतेन च विक्रमोर्वशीयस्य त्रोटकत्वमक्षुण्णं वर्तते।

यत्तु महाकविना कालिदासेन विक्रमोर्वशीयरूपकस्य प्रस्तावनायां नाटकमित्युल्लिखितं तत्तु नाटकशब्दस्य सामान्यतया समस्ते रूपकरूपे उपरूपकरूपे चार्थे प्रयोगो विद्यते। यतो हि सामान्यतया संस्कृतवाङ्मये नाटकशब्दो द्वयोरर्थयोः प्रयुक्तोऽस्ति। प्रथमोऽर्थः किल नाटकप्रकरणसमवकारडीमादिषु दसषु रूपकेषु प्रथमप्रकारत्वेन विख्यातो दृश्यते। (साहित्यदर्पणः ६।१) सर्वैरपि काव्यनाट्यशास्त्रीभिः प्रथमरूपकप्रकारत्वेन रूपकलक्षणप्रसङ्गे ससम्मानं प्रथमतया लक्षितं विद्यते। (नाट्यशास्त्रम् ३।२०/दशरूपकम् १।८) नाटकशब्दस्य द्वितीयोऽर्थस्तु समग्रानपि रूपकोपरूपकप्रकारानात्मनि संहरति। अतो रूपकनाटकशब्दौ पर्यायावपि वर्तेते।(अभिनवनाट्यदर्पणः, पृ. ७३) अत एव कालिदासेन रूपकरूपसामान्येऽर्थे एव नाटकशब्दः प्रयुक्तः।

**मालविकाग्निमित्रस्य सङ्क्षिप्तः परिचयः**

महाकवेः कालिदासस्य तिसृषु कृतिषु मालविकाग्निमित्रमप्यतीव मनोरमं रूपकं वर्तते। अस्मिन् रूपके पञ्चाङ्काः सन्ति। अत्र हि शृङ्गारो रसोऽङ्गित्वेन प्रस्तुतोऽस्ति। अन्ये च वीरहास्याद्भुतादयो रसा अङ्गरसत्वेनोपन्यस्ताः सन्ति। अत्र हि राज्ञोऽग्निमित्रस्य मालविकायाश्च प्रणयकथा काव्यनाट्यकलयोरनुपमेन योगेनोपन्यस्ता विद्यते। महाकविना कालिदासेन गणदासाख्यस्य नाट्याचार्यस्य मुखात् –

*देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं*
*रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।*
*त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते*
*नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधकम्॥ (मालविकाग्निमित्रम् १।४)*

इत्यस्मिन् पद्ये यथोक्तं तथैव मालविकाग्निमित्रमपि रूपकं भिन्नरुचीनां जनानां कृत एकं मनोरञ्जनसाधनं वर्तते। एतच्च वस्तुतो न केवलं मनुष्याणां प्रत्युत देवानां कृतेऽप्येकमत्यन्तं हृदयावर्जकमाराधकं विद्यते।

शरण्यस्य राज्ञोऽग्निमित्रस्य पार्श्वे संरक्षणार्थं नीयमाना विदर्भराजस्य माधवसेनस्यानुजा मालविका पितृव्यस्य यज्ञसेनस्य शैनिकैः पुनरपि मार्ग एवावरुद्ध्यते। संरक्षकवियुक्तापि सा केनापि प्रकारेण विदिशं प्राप्य महाराज्ञ्या धारिण्या

भ्रातुर्माध्यमेन नर्तकीरूपेण राजान्तःपुरे संरक्षणं लब्धुं समर्था भवति। मालविका हि स्वगुणैर्महाराज्ञीं धारिणीं स्वानुकूलां विधत्ते। धारिणी हि सुन्दरीं मालविकां राज्ञोऽग्निमित्रस्य समक्षं प्रस्तोतुं न वाञ्छति स्म। कदाचिदेकीभूतस्य परिवारजनस्य चित्रफलकेऽङ्कितां मालविकां दृष्ट्वाऽग्निमित्रस्तां द्रष्टुमुत्सुको जायते। ततश्च विदूषकस्य सहयोगेन वैदग्ध्यपूर्णे प्रतियोगितात्मके छलितनृत्यकार्यक्रमे नृत्यन्तीं मालविकां दृष्ट्वा राजा तस्यामनुरज्यते। सापि तस्यामनुरक्ता जायते। कदाचिद् रहसि मिलन्तौ तौ मालविकाग्निमित्रौ राज्ञ्या इरावत्या दृश्येते। कुपिता इरावती राजानं तिरस्कृत्य महाराज्ञीं धारिणीमनुरुद्ध्य मालविकां कारायां निक्षिपति। ततोऽपि विदूषकबुद्धिबलाद् मालविका कारागारमुक्ता राजपार्श्वं प्राप्नोति। पुनरपीरावत्या दृष्टौ तौ गृह्येते। अथ च शत्रून् विजीतवतो माधवसेनस्य सकाशाद् आयाताभ्यां गायिकाभ्यां मालविकाया राजकुमारीत्वेन परिचयः सञ्जायते। पादाघातादशोकः पुष्पाणां प्रफुल्लने धारिण्याः प्रतिज्ञानुसारेण पारितोषिकरूपेणेरावत्या अपि सम्मतिपुरस्सरमुभयोरुद्वाहः कारितः। प्रथमं कृतस्योत्पीडनस्य कृतेऽपि क्षमायाचनञ्च विहितम्।

## मालविकाग्निमित्रस्य नाटिकात्वम्

यद्यपि महाकविना कालिदासेन मालविकाग्निमित्ररूपकस्यामुखे विक्रमोर्वशीयमिवाभिज्ञानशाकुन्तलमिव च मालविकाग्निमित्रस्य नाटकनाम्नैव समुल्लेखो विहितो दृश्यते –'सूत्रधारः – अभिहितोऽस्मि विद्वत्परिषदा– "कालिदासग्रथितवस्तु मालिमिकाग्निमित्रं नाम नाटकमस्मिन्वसन्तोत्सवे प्रयोक्तव्यमि"ति।'(मालविकाग्निमित्रम् पृ.५) तथापि संस्कृतकाव्यशास्त्रस्यानुसारेण पर्यालोचने मालविकाग्निमित्रस्य नाटिकात्वं सिध्यति। संस्कृतनाट्यशास्त्रिभि-र्यथा रूपकवर्गे शुद्धवर्गे वा नाटकप्रकरणादीनां दश नाट्यसन्दर्भाणां निरूपणं कृतं तथैव सङ्कीर्णरूपकत्वेन चर्चिते उपरूपकवर्गे नाटिकात्रोटकगोष्ठ्यादीनामष्टादशाधिकानां सन्दर्भणां समुल्लेखो विहितो दृश्यते। महामुनिना भरतेन नाटिकाया एकस्या एव सङ्कीर्णरूपकत्वेन स्वरूपं समुल्लिखितं दृश्यते। महामुनेर्भरतस्य समुल्लेखानुसारेण नाटकप्रकरणयो रूपकयोर्विधायकतत्त्वयोगान्नाटिकायाः स्वरूपं सम्पद्यते। तत्र नायको नाटकेष्विव पुराणेतिहासादिषु ख्यातो राजा भवति। अन्तःपुरसम्बद्धा सङ्गीतादिकलाकुशला कन्यका नायिका, स्त्रीपात्राणां प्राचुर्यं चत्वारोऽङ्का ललितोऽभिनयो नाट्याङ्कानां सुसंयोजनं नृत्यगीतादीनाञ्चायोजनमपेक्षितं भवति। (नाट्यशास्त्रम् २०।६०–६४) आचार्येण विश्वनाथेन पूर्वाचार्यैः कृतानां चर्चाणां सारं समाहृत्य नाटिकायाः सुस्पष्टं लक्षणं प्रस्तुतमस्ति। नाटिकायां कदाचिन्नायकस्य ख्याततत्वेऽपि कथावस्तु सर्वथा कविकल्पनाप्रसूतं भवति चत्वारोऽङ्काः स्त्रीपात्राणां बहुलता धीरललितो राजा च नायको भवति। तत्र ह्यन्तःपुरसम्बद्धा सङ्गीतपरा नवानुरागा कन्या नायिका प्रगल्भा नृपवंशजैव ज्येष्ठा राज्ञी भवति। राजा ज्येष्ठया राज्ञ्या भीत एव नायिकायां प्रवर्तते। परमन्ते पदे पदे मानशीलया ज्येष्ठयैव राज्ञ्या तयोः संयोगो विधीयते। तत्र कैशिकी वृत्तिर्मुखप्रतिमुखगर्भनिर्वहण सन्धयः प्रयुज्यन्ते। उक्तञ्च विश्वनाथेन–

*नाटिका क्लृप्तवृत्ता स्यात्स्त्रीप्राया चतुरङ्किता।*
*प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः॥*
*स्यादन्तःपुरसंबद्धा सङ्गीतव्यापृताथवा।*
*नवानुरागा कन्यात्र नायिका नृपवंशजा॥*
*संप्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः।*

*देवी भवेत्पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा ॥*
*पदे पदे मानवती तद्वशः संगमो द्वयोः ।*
*वृत्तिः स्यात्कैशिकी स्वल्पविमर्शाः संधयः पुनः ॥ (साहित्यदर्पणः ६।२६९–२७२)*

एतच्च नाटिकालक्षणं मालविकाग्निमित्रे सर्वथा समन्वितं दृश्यते। तथा हि मालविकाग्निमित्रस्य कथावस्तु क्वापि पुराणेतिहासादिवाङ्मये दृष्टिपथं नावतरति। अत इतिहासे राज्ञोऽग्निमित्रस्य ख्याततत्वेऽपि निखिलमपि रूपकगतं कथावस्तु कविकल्पना कलितं विद्यते। अग्निमित्रो नायकस्तु इतिहासे ख्यातो विद्यते। यस्य काल इतिहासविद्भिः ख्रैस्ताब्दात् १७८ वर्षाणि पूर्वं निश्चीयते।(ए.वी.कीथ, संस्कृतनाटक पृ. १४८) राजश्यालकेनान्तःपुरं प्रापिता तत्रैव संरक्षितेति अन्तःपुरसम्बद्धतां विभ्राणा नवानुरागा कन्या मालविका नायिका विद्यते। सा च गणदासाख्यस्य नाट्याचार्यस्य प्रतिनिधित्वेन छलितनृत्यस्य स्पर्धायां भागं गृहीत्वा विजितवतीति नृत्यादिकलापारङ्गता विद्यते। नायको राजा अग्निमित्रो हि नाटिकालक्षणानुसारेणैव महाराज्ञ्या धारिण्या राज्ञ्याश्चेरावत्यास्त्रासेन शङ्कितो मालविकायां प्रवृत्तो भवति। नाटिका हि स्त्रीप्राया भवति। यस्यायमर्थो यत् नाटिकायां स्त्रीपात्राणां बाहुल्यं प्रभूत्वञ्च भवति। प्रायो रूपकान्तरेषु स्त्रीपात्राणि सङ्ख्यायां न्यूनतया समाहितानि भवन्ति। परमत्र मालविकाग्निमित्रे दशपुरुषपात्राणि द्वादशाधिकानि स्त्रीपात्राणि सन्ति। एतेन स्त्रीणां बाहुल्यं तु वर्तत एव प्राधान्यमपि तत्र स्त्रीणामेव दृश्यते। नाट्याचार्यस्य गणदासस्य हरदत्तस्य च छलितनृत्यसम्बन्धिन्यां स्पर्धायां पण्डिता कैशिकी निर्णेतृत्वेन नियुक्ता भवति। सैव च–

*श्लिष्टाक्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता ।*
*यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ॥ (मालविकाग्निमित्रम् १।१६)*

इत्यनेनाचार्याणां मर्यादां समुद्धोषयति। किञ्च राजप्रासादे राजापि राज्ञीभ्यां धारिणीरावतीभ्यां भीत एव स्वाभिलासं प्रति प्रवर्तते। राजा कुपितामिरावतीं चरणयोः पतित्वानुनेतुं यतते। एतेनापि स्त्रीणां प्राधान्यं स्पष्टीभवति किं बहुना। इरावत्याः सामान्यसेविका महाराजस्य मित्रं विदूषकं दण्डेन प्रहरति।( मालविकाग्निमित्रम् पृ.१८३) इरावती च महाराजं भर्तारमग्निमित्रं बारं बारं भर्त्सनेन सहैव स्वकीयया काञ्च्या तं ताडयितुमुद्यता भवति।( मालविकाग्निमित्रम् पृ.१२८) एतेन च स्त्रीपात्राणां बाहुल्येन प्राधान्येन च मालविकाग्निमित्रस्य नाटिकात्वं निश्चेतुं शक्यते। किञ्च नाटिकायां नायको धीरललितप्रकृतिको भवति। मालविकाग्निमित्रस्य नायकोऽग्निमित्रोऽपि राज्यव्यवस्थासञ्चालने निश्चिन्तः सन् तदपेक्षया नृत्यगीतादिषु सौन्दर्ये च रमते। अत एव महाराज्ञी धारिणी कदाचित् तं पुरत एव– 'देवी –(राजानमवलोक्य) यदि राजकार्येष्वीदृश्युपायनिपुणता भवेत्।'(मालविकाग्निमित्रम् पृ. ५१)इत्युक्त्वा भर्त्सयति। छलितनृत्यायोजनया तस्य कलासु रुचिर्दृश्यते। एतेन च नायकस्य धीरललितप्रकृतियुक्तत्वादपि मालविकाग्निमित्रस्य नाटिकात्वं संसाधितं भवति। यतो हि नाटिकायां धीरललितो नायकोऽपेक्षते। धीरललितो नायको हि राज्यसञ्चालने निश्चिन्तो मृदुस्वभावो नृत्यगीतादिकलासु चासक्तो भवति। मालविकाग्निमित्रस्य नायकोऽप्युपर्युक्तया रीत्या निश्चिन्तो मृदुस्वभावो नृत्यगीतादिकलास्वासक्तश्च विद्यते। अत एवाचार्यो रामचन्द्रमिश्रोऽपि रूपकस्यास्य नायकमग्निमित्रं धीरललितस्वभावमेवाङ्गी करोति। (मालविकाग्निमित्रं परिशिष्टम् पृ. १४४) नाटिकायां चत्वारोऽङ्का अपेक्षिता

भवन्ति परं मालविकाग्निमित्रे पञ्चाङ्काः सन्ति। अङ्कानां न्यूनाधिक्यं वस्तुनेतृरसादयो यथा रूपकाणां स्वरूपं प्रभावयन्ति तथा न प्रभावयति। अतः केवलया पञ्चाङ्कतया मालविकाग्निमित्रस्य नाटिकात्वं निवारयितुं न शक्यते।

काव्यशास्त्रीयनाटिकालक्षणानुसारेणैव नायकस्याग्निमित्रस्य नायिकाया मालविकायाश्च सङ्गमो महाराज्ञ्या धारिण्या राज्ञ्या इरावत्या चानुमतो वर्तते किञ्च रसाश्रयभूतानां नायकनायिकादीनां पात्राणां व्यवहारस्य च विश्लेषणेन नाटिकायां संयोगशृङ्गाररस एवाङ्गिरसत्वेन व्यवस्थितो भवति। मालविकाग्निमित्रेऽपि संयोगशृङ्गारस्यैव प्राधान्यं दृश्यते। अत एवाचार्येण बलदेवोपाध्यायेन मालविकाग्निमित्रं सर्वोत्कृष्टमादर्शमयं च नाटिकोदाहरणं वर्तत इति प्रतिपादितम्।(संस्कृत साहित्य का इतिहास पृ.५७९) एतेन मालविकाग्निमित्रं नामरूपकं कालिदासेन नाटकशब्दस्य रूपकरूपं सामान्यमर्थमादाय नाटकनाम्ना स्मृतमपि संस्कृतकाव्यशास्त्रदृशा तस्य सन्दर्भस्य नाटिकात्वमेव सिध्यति।

## अभिज्ञानशाकुन्तलस्य संङ्क्षिप्तः परिचयः

*अभिज्ञानशाकुन्तलं नाम नाटकं न केवलं महाकवेः कालिदासस्य त्रिसृषु रूपककृतिष्वेव* प्रत्युत विश्वस्य समस्तेऽपि नाट्यसाहित्ये समुत्कृष्टतमं मन्यते। सप्ताङ्केषु विभक्तेऽस्मिन् नाटके पद्मपुराणे महाभारते चोदितं वस्तुवृत्तमादाय तत्परिमार्जनपुरस्सरमत्यन्तमाकर्षकं नाट्यशास्त्रसम्मतञ्च विधाय प्रस्तुतं वर्तते। अभिज्ञानशाकुन्तलनाटकस्य नायको राजा दुष्यन्तः पुराणेषु प्रख्यातस्य कथावस्तुनः संवाहकः प्रख्यातश्चन्द्रकुले जातो विद्यते। स च संस्कृतकाव्यशास्त्रानुसारेणैव धिरोदात्तगुणान्वितो भवति। अभिज्ञानशाकुन्तले नाटके हि कविना कालिदासेन राज्ञो दुष्यन्तस्य चरित्रमुपजीव्यगतं चरित्रं किञ्चित् परिष्कृत्य नाटकानुकुलतया प्रस्तुतमस्ति। आखेटाय मृगमनुधावन् कण्वाश्रमं प्राप्तो दुष्यन्त आश्रमस्थैर्वैखानसैर्निषिद्धः प्रहर्तुं सज्जीकृतमपि बाणं विनम्रतापूर्वकं प्रतिसंहरति। वैखानसैरातिथ्यायानुरुद्धोऽप्याश्रमे विघ्नो माऽभूदिति रथादिकाश्रमस्योपान्तभाग एव संस्थाप्य तत्र प्रविशति। शकुन्तलां दृष्ट्वात्यन्तमनुरक्तोऽपि तस्याः क्षत्रियत्वं विनिश्चित्यैव प्रेम्णि प्रवर्तते। गान्धर्वेण विधिना शकुन्तलामुपयम्य राजकार्यवशात् सत्त्वरमेव राजप्रासादं नेतुमागमिष्यामीति शकुन्तलामाश्वास्य तस्यै अभिज्ञानरूपमङ्गुलियकं दत्वा राजप्रासादं निवर्तते।

तत्र दुर्वाससः शापवशात् शकुन्तलया सहोद्वाहस्य वार्तामपि विस्मरति। महर्षिणा कण्वेन ध्यानदृष्ट्या दुष्यन्तस्य शकुन्तलायाश्चोद्वाहस्य गर्भाधानस्य च सर्वं वृत्तं परिज्ञाय ससन्देशं गौतम्या शिष्याभ्यां च सह राजप्रासादं प्रति शकुन्तला प्रेष्यते। परन्तु दुर्वाससः शापबलात् विस्मृतसर्ववृत्तान्तो दुष्यन्तः तां स्वीकर्तुं न प्रभवति। अप्सरस्तीर्थे केनापि तेजपुञ्जेन शकुन्तला नीतेति वृत्तमाकर्ण्य स उदासीन एव दृश्यते। पश्चादभिज्ञानरूपमङ्गुलीयकमधिगत्य शापव्यपगमकारणात् सर्वमपिवृत्तं स्मृत्वा भृशमनुतपति। देवराजेनेन्द्रेण साहाय्यार्थं समाहूतः स्वर्गङ्गत्वा देवारीन् विजीत्य भूमण्डलं प्रत्यावर्तते। प्रत्यागमनकाले मध्यमार्गे महर्षेः कश्यपस्यादित्याश्च वन्दनार्थं तिष्ठति। तत्रैव सर्वदमननामानं पश्चात् भरतनाम्ना विख्यातं स्वपुत्रं पत्नीं शकुन्तलाञ्च प्राप्नोति। पुनः कश्यपस्यादित्याः चाशीर्वादं संप्राप्य पुत्रेण पत्न्या च सह राजधानीं प्रत्यागच्छति।

## अभिज्ञानशाकुन्तलस्य नाटकत्वम्

अभिज्ञानशाकुन्तलं हि संस्कृतनाट्यशास्त्रानुसारेण दसषु रूपकेषु प्रथमस्य रूपकप्रकारस्य नाटकस्य लक्षणं पूर्णतया समन्वेति। तथाहि नाटकं ख्यातवृत्तं स्यात् (साहित्यदर्पणः ६।७) इत्यनुसारेण अभिज्ञानशाकुन्तलस्य कथावस्तु पद्मादिपुराणेषु महाभारते च ख्यातं वर्तते। नाटकस्य वस्तु मुखप्रतिमुखादिभिः पञ्चसन्धिभिः बीजविन्द्वादिभिरर्थप्रकृतिभिः आरम्भप्रयत्नादिभिः पञ्चावस्थाभिश्च युक्तं भवति। (साहित्यदर्पणः ६।७) अभिज्ञानशाकुन्तले हि –

*तवास्मि गीतरागेण हारिणा प्रसभं हृतः।*
*एष राजेव दुष्यन्तः सारङ्गेणारतिरंहसा॥ (अभिज्ञानशाकुन्तलम् १।५)*

इत्यादिना कथावस्तुन आरम्भेण सहैव–
*मानुषीभ्यः कथं नु स्यादस्य रूपस्य सम्भवः।*
*न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥ ( अभिज्ञानशाकुन्तलम् १।२८)*

इत्यादिना दुष्यन्तस्य शकुन्तलां प्रत्यभिलाशबीजेन सहैव द्वितीयाङ्के प्रस्तुतेन मुखसन्धिना समारभ्य सप्तमाङ्के–
*उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदन्तरं पयः।*
*निमित्तनैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्तु सम्पदः॥ (अभिज्ञानशाकुन्तलम् ७।३९)*

इत्यादिना मरीचेः प्रसादेन शकुन्तला सर्वदमनयोः पत्नीपुत्ररूपफलागमसङ्केतेन प्रस्तूयमानस्य निर्वहणसन्धिर्यथायथं वस्तुविधानस्यङ्गानां समुचितयोगोऽभिज्ञानशाकुन्तले दृष्टिपथमवतरति।

संस्कृतकाव्यशास्त्रानुसारेण नाटकेषु विलाससमृद्ध्यादीनां गुणानामनेकेषां विभूतिनाञ्च प्रस्तुतिरपेक्ष्यते। (साहित्यदर्पणः ६।७) अभिज्ञानशाकुन्तलेऽपि शकुन्तलादुष्यन्तयोर्विलासस्य, आश्रमगतस्य तपसो दुष्यन्तराज्य–गतस्यैश्वर्यस्य चावश्यकं वर्णनं वर्तते। नाटकेषु सुखेन सहैव दुःखस्याप्यनुभूतेर्वर्णनं समपेक्ष्यते। (साहित्यदर्पणः ६।८) अभिज्ञानशाकुन्तलेऽपि प्रारम्भे दुष्यन्तशकुन्तलयोर्मनोनुकूलस्यार्थस्य लाभेन सुखस्य, दुर्वाससः शापेन दुष्यन्तस्य स्मृतेर्लोपात् शकुन्तलायाः प्रत्यादेशेन शकुन्तलायां समुत्पन्नस्य दुःखस्य, तत्रैव चाङ्गुलीयकप्राप्तेरनन्तरं शकुन्तलाया विरहजन्यस्य दुःखस्य, पुनश्च देवारिहननेन देवराजस्य च सम्मानस्य कारणेन दुष्यन्ते समुत्पन्नस्य सुखस्यानुभूतेर्मरीच्याश्रमे पत्न्या शकुन्तलया सह पुत्रस्य सर्वदमनस्य च मिलनेन दुष्यन्तशकुन्तलासर्वदमनानां च हृदि समुत्पन्नस्य सुखस्यानुभूतेर्दृश्यानां विद्यमानत्वात् सुखदुःखसमुद्भुतिरप्यभिज्ञानशाकुन्तले संस्कृतकाव्यशास्त्रानुसारेण समाविष्टा वर्तते।

रूपकस्याद्यप्रकाररूपेण प्रस्तुतेषु नाटकेष्वनेकेषां रसानां नैरन्तर्येणाभिव्यञ्जना भवति। (साहित्यदर्पणः ६।८) अभिज्ञानशाकुन्तलेऽपि भयानकशृङ्गारहास्यकरुणवीराद्भूता रसा नैरन्तर्येण व्यक्ताः सन्ति। नाटकेषु न्यूनातिन्यूनं पञ्च

अधिकाधिकञ्च दश अङ्का भवन्ति। (साहित्यदर्पणः ६।८) अभिज्ञानशाकुन्तलेऽपि पञ्चसङ्ख्यातोऽधिका दशसङ्ख्यातो न्यूनाः सप्ताङ्का विद्यन्ते।

चन्द्रवंशे जातो विख्यातो राजा दुष्यन्तो नायको विद्यते। नाटकेषु शृङ्गारवीरयोरन्यतर रसोऽङ्गी भवति। अत्रापि शृङ्गारोऽङ्गी वर्तते। अन्ये च वीरभयानकहास्याद्भुतादयो रसा अङ्गत्वेन प्रस्तुता सन्ति। "बालः— जृम्भस्व रे सिंहशावक !! जृम्भस्व, दन्तान् ते गणयिष्यामि।" (अभिज्ञानशाकुन्तलम् पृ.४१६) इत्यादौ बालकस्य सर्वदमनस्य सिंहदन्तगणनरूपेण लोकातिशायिना चरित्रेण निर्वहणसन्धौ व्यक्तोऽद्भुतरसोऽपि नाट्यशास्त्रानुसारेण अभिज्ञानशाकुन्तलस्य नाटकलक्षणस्य (साहित्यदर्पणः ६।९–११) अनुगमं समाख्याति।

उपर्युक्तरीत्या महाकवेः कालिदासस्याभिज्ञानशाकुन्तलं नाम रूपकं संस्कृतकाव्यशास्त्रानुसारेण प्रायः सर्वैः काव्यशास्त्रिभिर्दशसु रूपकेष्वाद्यरूपकत्वेन व्याख्यातस्य नाटकस्य लक्षणेन समन्वितं वर्तत इति नाटकसंज्ञितं रूपकं सिध्यति। स्वयं महाकविना कालिदासेनाभिज्ञानशाकुन्तलस्यामुखे नाटकनाम्नैव चर्चितं दृश्यते। प्रायः संस्कृतनाटककाराः प्रस्तावनापरपर्यायत्वेन स्मृते रूपकस्यामुखे स्वल्पतरेणात्मपरिचयेन सहैव रूपकस्य नाम्नः तद्विषयिण्याः स्वकीयाया दृष्टेश्च दिग्दर्शनं विदधाना दृश्यन्ते। विश्वनाथस्यानुसारेण नटीविदूषकपारिपार्श्वको वा नाट्यनिर्देशकेन सूत्रधारेण सहिता रूपकप्रणेतू रूपकसंज्ञायाः तत्प्रकारस्य प्रथमाभिनयस्य तत्सम्बन्धिन्या दृष्टेश्च सन्दर्भं संवादस्य माध्यमेन प्रस्तुवन्ति तदामुखमुच्यते। आमुखमिदं बहुधा प्रस्तावना नाम्नापि स्मृतं दृश्यते –

*नटी विदूषको वापि पारिपार्श्वक एव वा।*
*सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥*
*चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।*
*आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा॥(साहित्यदर्पणः ६।३१–३२)*

अभिज्ञानशाकुन्तलेऽपि महाकविना कालिदासेन सूत्रधारस्य नट्याश्च मुखादेषोऽर्थोऽत्यन्तं संक्षेपेण प्रस्तूयते – 'सूत्रधारः– आर्ये ! इयं हि रसभावविशेषदीक्षागुरोर्विक्रमादित्यस्य अभिरूपभूयिष्ठा परिषत्। अस्याञ्च कालिदासग्रथितवस्तुना नवेनाभिज्ञानशाकुन्तलनामधेयेन नाटकेनोपस्थातव्यमस्माभिः, तत्प्रतिपात्रमाधीयतां यत्नः।' (अभिज्ञानशाकुन्तलम् पृ.५) एतेन च नटीसूत्रधारयोः संवादेन रसभावदीक्षागुरो राज्ञो विक्रमादित्यस्याभिरूपायां संसदि प्रथमतयाऽभिनीतमभिज्ञानशाकुन्तलं नाटकसंज्ञकं रूपकं विद्यत इति महाकवेः कालिदासस्यात्मनो दृष्टिकोणोऽपि सङ्क्षेपे सत्यपि सुस्पष्टतया चित्रितो विद्यते।

## निष्कर्षः

संस्कृतनाट्यशास्त्रे हि महामुनेर्भरतस्य समयादेव नाटकशब्दो द्वयोरर्थयोः प्रयुक्तो दृश्यते। रूपकसामान्यरूपेऽर्थे रूपकविशेषरूपेऽर्थे च। तत्र सामान्येनार्थेन नाटकप्रकरणादीनि दशरूपकाणि नाटिकात्रोटकसट्टकादीनि च सर्वाण्यप्युपरूपकानि यद्वा नाटकप्रकरणादीनि दश शुद्धरूपकाणि नाटिकात्रोटकसट्टकादीनि चानेकानि सङ्कीर्णरूकाणि सङ्गृह्यन्ते। रूपकविशेषरूपेऽर्थे तु प्रायः सर्वैरपि नाट्यशास्त्रिभिर्दशसु रूपकसन्दर्भेषु प्रथमतया गणितो रूपकप्रकारो

नाटकशब्देन व्यवहृतो दृश्यते। प्रायः भरताभिनवगुप्तप्रभृतिभिराचार्यैर्नाटकशब्द एतयोरेव द्वयोरर्थयोः प्रयुक्तो दृश्यते। भरतात् पूर्वमपि कोहलादिभिराचार्यैः त्रोटकगोष्ठ्यादीनामनेकेषां सङ्कीर्णरूपकाणां यद्वोपरूपकाणां चर्चा विहिता आसीत्। अत एव महामुनेर्भरतस्य नाम समुल्लिखन् महाकविकालिदासो भरतकोहलादीभिर्निरूपितै-र्नाट्यप्रकारैरपरिचित आसीदिति कथयितुं न शक्यते। अत एव तेन नाटकमिति सामान्यसंज्ञयैव स्वकीयानां त्रयाणां रूपकाणां चर्चा विहिता। वस्तुतस्तु रूपकप्रकाराणां स्वरूपानुसारेण विश्लेषणे विहिते विक्रमोर्वशीयमुपरूपकरूपं सङ्कीर्णरूपं वा त्रोटकं मालविकाग्निमित्रमुपरूपकरूपा सङ्कीर्णरूपा वा नाटिका अभिज्ञानशाकुन्तलञ्च प्रथमरूपकप्रकाररूपं शुद्धरूपकरूपं वा नाटकं सिध्यति।


## कृतज्ञताज्ञापनम्

शोधकार्येऽस्मिन् येषां विदुषां ग्रन्था अध्ययने प्रयुक्ता येषाञ्च विदुषामुत्प्रेरणाभिः साहाय्यं विहितं यैश्च शोधकार्यमिदं समीक्ष्य प्रकाशनार्हं विहितं तेषां सर्वेषां कृते कृतज्ञतां समर्पयामि।


## सन्दर्भाः


उपाध्यायः, बलदेवः (१७३९ ई.) *संस्कृत साहित्य का इतिहास* शारदा संस्थान।

कालिदासः, (१९९८ ई.) *अभिज्ञानशाकुन्तलम्* भारतीय विद्याप्रकाशन।

कालिदासः, (२०३३ वि.सं.) *मालविकाग्निमित्रम्* चौखम्बा संस्कृत सीरीज आफिस।

कालिदासः, (२०३३ वि.सं.) *विक्रमोर्वशीयम्* चौखम्बा संस्कृत सीरीज आफिस।

चतुर्वेदी, सीतारामः (२०२६ वि.सं.) *अभिनवनाट्यशास्त्रम्* चौखम्बा संस्कृत सिरीज अफिस।

द्विवेदी, रेवाप्रसाद (१९६९ई.) *रसार्णवसुधाकरः* (शिङ्गभूपालकृतः) संस्कृतपरिषद् सागरविश्वविद्यालयः

धनञ्जयः, (२०२९ वि.सं.) *दशरूपकम्* चौखम्बा विद्याभवन।

म.म.प. शिवदत्त तथा अन्य (सं), (१९३४ ई.) काव्यानुशासनम् (हेमचन्द्रकृतम्), पाण्डुरङ्क जावात्री निर्णसागर प्रेस।

रामचन्द्रगुणचन्द्रौ (१९९० ई) *नाट्यदर्पणः* दिल्ली विश्वविद्यालय।

विश्वनाथः (२००० ई.) *साहित्यदर्पणः* मोतिलाल बनारसीदास।

शास्त्री, मधुसूदनः(सं), (१९७१ ई.) *नाट्यशास्त्रम्* (प्रथमो भागः) काशी हिन्दू विश्वविद्यालयः।

शुक्लः, बाबुलालः(सं), (२००५ ई.) *नाट्यशास्त्रम्* (तृतीयो भागः) चौखम्बा संस्कृत संस्थान।

शुक्लः, बाबुलालः(सं),(१९८३ ई.) *नाटकलक्षणरत्नकोषः* चौखम्बा संस्कृत संस्थान।

सिंह, उदयभानुः(अनु.), (१९७१ ई.) *संस्कृतनाटक* (ए.वी. कीथकृत), मोतीलाल वनारसीदास।